Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 6 | ISSN : 2582-0095

# वेदाङ्गेषु व्याकरणस्य मुखस्थानीयत्वम्

डॉ. डी.फणियज्ञेश्वर याजुलु
कृष्णयजुर्वेद विभाग:, श्री वेङ्कटेश्वर वेद विश्वविद्यालय:, तिरुपति:

**Article Info**
Volume 6, Issue 6
**Page Number :** 205-208
**Publication Issue :**
November-December-2023
**Article History**
Accepted : 10 Dec 2023
Published : 30 Dec 2023

**शोध सारांश:-** वेदाश्चत्वारो भवन्तीति सर्वे विद्वांसो विदन्ति। यथा सर्वस्यापि शरीरधारिण: हस्तपादाद्यङ्गानि भवन्ति तद्वत् वेदपुरुषस्यापि अङ्गानि वर्तन्ते। पुरुषाकृति: अङ्गानां संयोगेन यथा निर्मीयते तथा वेदस्यापि मुख्यान्यङ्गानि षड्भवन्ति।तेषु वेदपुरुषस्य प्रधानतममङ्गं भवति व्याकरणं "मुखं व्याकरणं स्मृतम्"इति निर्देशात्। मुखत्वादस्य शास्त्रस्य मुख्यत्वं स्वयमेव सिध्यति।

**कुञ्चिका शब्दा:-** षडङ्गानि, व्याकरणम्, प्रकृति:, प्रत्यय:,कामधुक्,अन्धंतम:, सप्ताहस्तास:, वृषभ:,उशती, पदशास्त्रम् ।

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्यभियुक्ते: प्रयोजनेन विना कस्यापि कुत्रापि प्रवृत्ति: न सम्भवति। अत: अस्मिन् शास्त्राध्यने प्रवृत्तिं जनयितुं पतञ्जलि: स्वकीये महाभाष्ये बहूनि प्रयोजनानि अकथयत्। तत्प्रयोजनावाप्तये मुनित्यकृतं व्याकरणमवश्यमध्येतव्यम्। येन प्रकारेण मुखं विना भोजनादेरकरणात् शरीर पुष्टि: न सम्भवति तेनैव प्रकारेण व्याकरणं विना वेदरूपिण: पुरुषस्य शरीर रक्षा दुर्वाहा भवतीति अस्य शास्त्रस्य मुखभावत्वं स्वीकृतमस्ति। वेदे लोके च साधुशब्दानां ज्ञानपूर्वक प्रयोगेण ऐहिकामुषमिकफलप्राप्तये व्याकरणस्य महती आवश्यकता अस्ति।अत एव मुनित्रय व्याकरणस्य व्याकरणम् इति वेदाङ्गप्रतिनिधित्व स्वीकरणं सर्वथा समुचितमस्ति।

विदितचरमेवैतत् समेषां विद्वत्तल्लजानां यत् शिक्षादि षडङ्गानि वेदानां रक्षणार्थं प्रवृत्तानीति। तेषु षडङ्गेषु व्याकरणस्य मुखस्थानीयत्वं प्रकल्पितम्। तद्यथा-

**छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथपठ्यते।**
**ज्योताषामयनं चक्षु: निरुक्तं श्रोत्रमुच्यते।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात्साङ्गमधीयानो ब्रह्मलोके महीयते। (पा।।शि 41,42)**

व्याकरण शब्दस्य व्युत्पत्तिलभ्य: अर्थ: प्रकृतिप्रत्ययादयो यत्र व्याक्रियन्ते विविच्यन्ते तत् व्याकरणम् इति। प्रकृति प्रत्यययो: , आकृति द्रव्ययो:,पदपदार्थयो:,शब्दापशब्दयो:, ध्वनिस्फोटयो: विवेचनमेव व्याकरणस्य मुख्यार्थ:।

महाभाष्यकारेण भगवता पतञ्जलिना व्याकरणशास्त्रस्य नैकानि प्रयोजनानि उपस्थापितानि वर्तन्ते। तद्यथा-

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**रक्षोहागमलघ्वसन्देहाः प्रयोजनम्**। म.भा.1.1.3 । अपि च

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्** । म.भा.1.1.3

एवं व्याकरणशास्त्राध्ययनस्य उपयोगिता, षडङ्गेषु व्याकरणस्य मुख्यत्वं च प्रतिपादितं वर्त्तते।

वर्णोच्चारणज्ञानं विना केनापि विदुषा शास्त्रज्ञत्वं न प्राप्यते। व्याकरणादृते शुद्धशब्दज्ञानं सुशब्दप्रयोगश्च न सम्भाव्यते। अत एव महाभाष्यकारेण प्रशस्यते-

**एकशशब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति।** (म.भा.आ.1)

महावैयाकरणः भर्तृहरिरपि

**साधुत्व ज्ञानविषया सैषा व्याकरण स्मृतिः(वा.प.ब्र.का.1.143)**

इति निर्दिशन् शब्दसाधुत्वज्ञानार्थं व्याकरणस्य आवश्यकतामुपादिशत्। सर्वमपि लोकव्यवहारं भाषयैव प्रवर्तते। यदि भाषा न स्यात् तर्हि व्यवहाराभावात् इदं जगत् अन्धे तमसि मज्जेत्। यथोक्तं दण्डिना –

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।** (का.द.1.4)

शुद्ध भाषा प्रयोगार्थं व्याकरणं नितरामपेक्षते। एतत् ज्ञानं विना जनः साधु शब्दं प्रयोक्तुं नार्हति।
तथाचोक्तं वाक्यपदीये-

**शब्दार्थ सम्बन्ध निमित्त तत्त्वं वाच्यविशेषोऽपि च साध्वसाधून्** ।

**साधु प्रयोगानुमिताश्च शिष्टान्न वेद यो व्याकरणं न वेद।**। (वा.प.1.12) इति ।

ऋक्संहितायां व्याकरणशास्त्रस्य प्रशंसायां नैके मन्त्राः भिन्न-भिन्न स्थलेषु उपलभ्यन्ते। तत्र एकस्मिन् प्रसिद्धे मन्त्रे व्याकरणं वृषभस्य रुपकत्वेन व्याख्यातं वर्त्तते।

**चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।** (ऋ.सं.4.58.3)

**अस्यायमर्थः** - अस्य वृषभरुपस्य व्याकरणस्य नामाख्यातोपसर्गनिपातरूपाणि चत्वारि शृङ्गाणि सन्ति। भूतभविष्यद्वर्तमाना अस्य त्रयः पादाः। सुबन्त तिङन्त रुपे द्वे शीर्षे स्तः। याः सप्त विभक्तयः सन्ति ताः सप्त हस्ताः।
अन्यस्मिन् मन्त्रे अपि-

**उतत्वः पश्यन्न ददर्श वाचम् उत्वश्शृण्वन्नशृणोत्येनाम्।**

**उतोत्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः।** (ऋ.सं.10.71.4)

एवंविध महत्वपूर्णस्य संसारदीपकस्य व्याकरणस्य यः अनभिज्ञः अस्ति, सः जानन्नपि न जानाति, पश्यन्नपि न पश्यति, शृण्वन्नपि न शृणोति। किञ्च यो जनः व्याकरणमधीत्य साधुशब्दप्रयोगं सम्यक् जानाति तस्य सन्निधौ वाणी स्वलङ्कृता कामिनीव स्वयमागत्य तिष्ठति।

व्याकरणज्ञानशून्यः न साधुशब्दान् प्रयोक्तुम् ईष्टे। अत एव पतञ्जलिराह-

**रक्षार्थं वेदानामध्येयं व्याकरणं, लोपागमवर्णविकारज्ञो हि पुरुषः सम्यग्वेदान् परिपालयिष्यति**। (म.हा.1.1.3) इति

वेदरक्षाक्षमत्वात् व्याकरणस्य वेदाङ्गत्वं समर्थ्यते। यः पुरुषः लोपागमवर्णविकारज्ञानयुक्तः, सः एव वेदान् साधु पालयितुं क्षमते। तथा हि- वेदे **"जहार"** इति क्रियापदस्य स्थाने **"जभार"** इति प्रयुज्यते। व्याकरणज्ञान रहितः पदमिदं न साध्विति मत्वा जहार इत्येव प्रयोक्तुमुपक्रमते। तेन व्याकरण ज्ञान शून्यतया महदनर्थं प्राप्नुयात्। तस्मात् व्याकरणाध्ययनम् अतितरामपेक्ष्यते। एवं विभक्तिविपरिणामज्ञानाय, यथार्थज्ञानलाभाय संशयनिरासार्थञ्च अध्येयं व्याकरणम्। अन्यान्यपि अपभाषण-दुष्टशब्द-अर्थज्ञान-धर्मलाभ-नामकरणादीनि प्रयोजनानि महाभाष्ये व्याख्यातानि वर्तन्ते।

पतञ्जलेरपि प्राचीनः निरुक्तकारः यास्कोऽपि चत्वारिशृंगेत्यादि केषाञ्चिन्मन्त्राणां व्याकरणशास्त्रपरतया व्याख्यामकरोत्।

व्याकरणमिति पदं यस्माद्धातोः निष्पन्नं तस्यापि मूलं

**दृष्ट्वा रूपे व्याकरोत्। सत्यानृते प्रजापतिः** । (तै.ब्रा.2.6.2)**इति** तैत्तिरीय ब्राह्मणे प्राप्यते।

श्रीमद्रामायण रचना कालेऽपि व्याकरणस्य अध्ययनम् अध्यापनञ्च सुव्यवस्थितमासीत् अयं च विषयः -

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**

**बहु व्याहरतानेन नकिञ्चिदपभाषितम्।** (वा.रा.4.3.29)

इति हनुमद्विषये रामोक्त्या अवगम्यते।

एवं गोपथ ब्राह्मणेऽपि व्याकरणस्य उल्लेखो दृश्यते।

**ओङ्कारं पृच्छामः , को धातुः, किं प्रातिपदिकम्, किं नामाख्यातम्, किं लिङ्गम्,किं वचनम्,का विभक्तिः, कः प्रत्ययः,को विकारी,कति मात्रः,कति वर्णः, कत्यक्षरः,कति पदः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम्।** (गो.ब्रा.1.1.23) इति

ऐतरेय ब्राह्मणे- **सप्तधा वै वागभवत्** ( ऐ.ब्रा.8.69.12) इति वाक्ये सप्तधा इत्यत्र सप्त विभक्तयः इति भट्टभास्कराचार्यैः व्याख्यातम्। **विपश्चितः** अस्य शास्त्रस्य दृष्टादृष्टफलप्रदत्वात् व्याकरणाध्ययनम् उत्तमं तपः, तथा च इदं शास्त्रं वेदस्य अत्युपकारकं प्रधानमङ्गं मन्यन्ते। तथा च भर्तृहरिः-

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।**

**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः। ( वा.प 11)**

महाभारते उद्योगपर्वणि व्याकरणस्य महत्वमित्थं प्रतिपादितम्-

**सर्वार्थानां व्याकरणात् वैयाकरण उच्यते।**

**तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा।। ( म।भार। 43-61)**

पाराशर पुराणे अपि-

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन** ।।(पा.पु.**8-29**)

**अनादि निधनं ब्रह्म शब्दतत्वं यदक्षरम्।**

**विवर्ततोऽर्थभावेन प्रक्रिया जगतो यतः।। वा.प .13**

इति शब्दस्य महत्वं कथयति भर्तृहरिः।

इदं पदशास्त्रं मोक्षद्वारं तथा मुमुक्षूणां मोक्षस्य प्रथमम् आरोहणमपीति उद्घोषयति तत्रैव भर्तृहरि:। तद्यथा-

**तदद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते। वा.प.14**

**इदमाद्यं पदस्थानं सिद्धसोपानपर्वणाम।**

**इदं सा मोक्षमाणानामजिह्मा राजपद्धति:।। वा.प.16**

इत्थं व्याकरणशास्त्रस्य महत्ता तदुपादेयता च बहुषु ग्रन्थेषु अभिवर्णिता दृश्यते।

अस्य शास्त्रस्य ऐहिकामुष्मिकफलप्रदत्वात्, वेदानां रक्षकत्वात्, वेदार्थावबोधने सहायकत्वात्, प्रकृति प्रत्ययोपदेशपुरस्सरं पदस्वरुपस्य प्रतिष्ठापकत्वात्, अर्थनिर्णयकृत्साधनेषु मुख्यतमसाधनत्वेन प्रयुक्तत्वात् **'मुखं व्याकरणं स्मृतम्'** इति वाक्यम् सुतराम् अन्वर्थतामेतीत्यत्र नास्ति लेशोऽपि संशय:।

**वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।**

**पाणिनिं सूत्रकारञ्च प्रणतोऽऽस्मि मुनित्रयम्।।**

## संकेताक्षर सूचि एवं संदर्भ ग्रंथ सूची


1. म.भा-महाभाष्यम्,Deccan education society,Pune - 1963
2. पा.शि- पाणिनीय शिक्षा ,Chaukhaba surbharati granthamala ,Varanasi - 1994
3. वा.प- वाक्यपदीयम् ,Sampoornananda Sanskrit University ,Varanasi- 1976
4. ऋ.सं- ऋक्संहिता,Chaukhaba Sanskrit series ,Varanasi . 1965
5. श्री.रा- श्रीमद्रामायणम्,Gita press,Gorakhpur - 2012
6. गो.ब्रा- गोपथ ब्राह्मणम्,Chaukhaba Sanskrit prathisthan,New Delhi- 1993
7. ऐ.ब्रा- ऐतरेय ब्राह्मणम्,University of Travancore,Tiruvananthapuram -1942
8. म.भार- महाभारतम्,Gita press,Gorakhpur - 1956
9. प.पु- पाराशर पुराणम्,Sampoornananda Sanskrit University ,Varanasi-1990
10. तै.ब्रा- तैत्तिरीय ब्राह्मणम्,Anandashramam,,Pune- 2008